X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 63

Title VISNUPANJARA STOTRA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 63. Subject: Stotra.

Title: Viṣṇupañjara stotra.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 7.7" x 3.4" Extent: 2 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Complete.

॥श्रीगणेशायनमः॥ ॥श्रीरामचन्द्राभ्यांनमः॥ ॥ॐअस्यविष्णुपंजरमंत्रस्तोत्रस्यनारदऋषिरनु
ष्टुप्छंदः श्रीब्रह्मः परमात्मा देवता सर्वरक्षार्थेजपेविनियोगः॥ ॥अथध्यानं॥ ॥परंपरस्यप्रकृ
तेरनादिमेकं निविष्टं बहुधागुहायां। सर्वालयं सर्वचराचरस्थं नमामिविष्णुं जगदेकनाथं॥१॥ॐवि
ष्णुपंजरं महादिव्यं सर्वदुष्टनिवारणं। उग्रतेजंमहावीर्यं सर्वशत्रुनिकंदनं॥२॥त्रिपुरंदहमानेन
ब्रह्मणाईश्वरोदितं। तदहं संप्रवक्ष्यामि आत्मरक्षासदाभवेत्॥३॥पादौरक्षतुगोविंदो जंघेचै
वत्रिविक्रमः। ऊरूमेकेशवोरक्षेत् कटिंदामोदरस्तथा॥४॥उदरं पद्मनाभस्तु पृष्ठंचैवतुमाधवः।
वामपार्श्वेस्थितोविष्णुर्दक्षिणेमधुसूदनः॥५॥बाहूद्वौवासुदेवश्चहृदयंचजनार्दनः। कंठंरक्षेत् रामः
ज्ञेवाराहः तथास्यंमुखमंडलं॥६॥माधवः कर्णमूलेषु हृषीकेशस्तुनासिके। नेत्रे नारायणो १

रक्षेल्ललाटेगरुडध्वजः॥७॥ कपोलौकेशवो रक्षेत् वैकुंठः सर्वतोदिशि। श्रीवत्सोपित
सर्वेषां शरीरं चैवरक्षयेत्॥८॥ पूर्वस्यां पुंडरीकाक्षः आग्नेय्यां श्रीधरस्तथा। दक्षिणे
नरसिंहश्च नैरृत्यांच दामोदरः॥९॥ पुरुषोत्तमश्च वारुण्यां वायव्यां पीतवस्त्रधृक्।
गदाधरस्तुकौवेर्यां शंखवईशानतो दिशी॥१०॥ आकाशेच गदारक्षेत् पाताले च सुदर्शनः
।सन्नद्धः सर्वगात्रेषु प्रविष्टो विष्णुपंजरं॥११॥ विष्णुपंजरमध्यस्थो विचरामिमहीतले
।राजद्वारे पथेघोरे संग्रामे शत्रुसंकटे॥१२॥ नदिषु तरणेचैवचौरव्याघ्रभयेषु च। डाकिनी
प्रेतभूतेषु भयं तस्य न जायते॥१३॥ रक्षरक्षमहारक्ष रक्षनरेश्वरः॥ रक्षंतु सर्वदेवानां ब्रह्मवि
ष्णुमहेश्वराः॥१४॥ जलेरक्षतु वाराहः स्थलेरक्षतु वामनः। अटव्यां नृसिंहोस्तु सर्वतः पातु

केशवः।१५। दिवारक्षतु सूर्यस्य रात्रौरक्षतु चंद्रमाः। पंथानंदुर्गमंरक्षेत् सर्वमेवजनार्द
नः।१६। रोगविघ्नहतश्चैव ब्रह्महा गुरुतल्पगः।। स्त्रीहत्या बालघाती च सुरापी वृषली
पतिः।।१७।। अपुत्रो लभते पुत्रं धनार्थी लभते धनं। विद्यार्थी लभते विद्यां मोक्षार्थी लभ
ते गतिं।१८। आपदो हरते नित्यं विष्णुस्तोत्रार्थसंपदा। य इदं पठते स्तोत्रं विष्णुपंजरमु
त्तमं।१९। मुच्यते सर्वपापेभ्यो मोक्षयित्वा मिसर्वदा। गोसहस्रफलं तस्य वाजपेय
सतानि च।२०। अश्वमेधसहस्राणि फलं प्राप्नोति मानवः।२१। ।। इति विष्णुपंजरस्तो
त्रं संपूर्णं ।। ।।श्रीरस्तु।। ।।श्री